श्रीः

# ॥ श्रीरामपञ्चरत्नम् ॥

कञ्जातपत्रायत लोचनाय कर्णावतंसोज्ज्वल कुण्डलाय।
कारुण्यपात्राय सुवंशजाय नमोऽस्तु रामाय सलक्ष्मणाय॥ १ ॥

विद्युन्निभाम्भोद सुविग्रहाय विद्याधरैस्संस्तुत सद्गुणाय।
वीरावताराय विरोधिहर्त्रे नमोऽस्तु रामाय सलक्ष्मणाय॥ २ ॥

संसक्त दिव्यायुध कार्मुकाय समुद्र गर्वापहरायुधाय।
सुग्रीवमित्राय सुरारिहन्त्रे नमोऽस्तु रामाय सलक्ष्मणाय॥ ३ ॥

पीताम्बरालङ्कृत मध्यकाय पितामहेन्द्रामर वन्दिताय।
पित्रे स्वभक्तस्य जनस्य मात्रे नमोऽस्तु रामाय सलक्ष्मणाय॥ ४ ॥

नमो नमस्तेऽखिल पूजिताय नमो नमस्तेन्दुनिभाननाय।
नमो नमस्ते रघुवंशजाय नमोऽस्तु रामाय सलक्ष्मणाय॥ ५ ॥

इमानि पञ्चरत्नानि त्रिसन्ध्यं यः पठेन्नरः।
सर्वपाप विनिर्मुक्तः स याति परमां गतिम्॥ ६ ॥

॥ इति श्रीरामपञ्चरत्नं समाप्तम् ॥